**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2023 SHISRRJ | Volume 6 | Issue 6
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# श्रीमन् मध्वसिध्दान्ते वेदार्थज्ञानं ब्रह्मसूत्रेतिहासपुराणद्वारैव

**डॉ. गुरुमध्वातिरूमलाचार्य नवलि**
संस्कृत विभागाध्यक्ष:, नूतन विद्यालय पदवी महाविद्यालय:, कलबुरगि।

**Article Info**
**Publication Issue :**
November-December-2023
Volume 6, Issue 6
**Page Number :** 66-69
**Article History**
Received : 01 Dec 2023
Published : 12 Dec 2023

**शोधसारांश:–** पूर्वोक्त प्रमाणै: एवं ज्ञातव्यं। ज्ञानेच्छाप्रयत्नाद्यनुसन्धानरहितजडस्य दु:खं नास्ति। ईशस्य सर्वज्ञस्य च न दु:खं, किन्तु ईश्वराधीनमायाच्छादित लिङ्गशरीरवतो सात्विकजीवस्य दु:खं विद्यते। तस्यैव दु:खनाशाय वेदा: प्रवर्तिता:। “वेदैश्च सर्वेरहमेव वेद्य:” इति गीताचार्य वचनेन सर्वे हि वेदा: परमात्मानमेव प्रतिपादयन्ति। महायोगेन महारूढ्याच मुख्यत: वेदप्रतिपाद्यत्वं नारायणस्यैव इति प्रमाणै: प्रतिपादितम्। ब्रह्मसूत्रेतिहासपुराणैरेव वेवस्य अर्थविशवीकरणं कर्तव्यमिति इतिहासपुराणाभ्यां बेद समुपबृंहयेत् इति श्रुति: स्वयमेव घण्टाघोषेण प्रतिपादयति। तस्मात् वेदैकवेद्य श्रीहरे: चरणाराधनेनैव अपरोक्षज्ञानं तदनन्तरं तीव्र या भक्त्या तस्य अत्यर्थप्रसाद:, तेन दु:खनाश: अनन्तरं स्वरूपानन्दप्रप्ति:। एतादृश स्वस्वरूपानन्दाविर्भावरूप मोक्षस्य अपेक्षा यस्य वर्तते एतादृशवेदाध्ययनेनैव भगवन्तं नारायणं सन्तुष्टीकृत्य परमानन्दं प्राप्नुयात् इति श्रीमदानन्दतीर्थ ’भगवत्पादीय वेदाध्ययनरीति:। यत्करोष यदश्नासि यज्जुहोषि दवासि यत्। यत् तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणमिति भगवद्वचनमादृत्य श्रीमध्वान्तर्गतश्रीकृष्णचरणारविंदयो: पत्रमिदं समर्पयामि।

**मुख्यशब्दा:–** श्रीमन्मध्वसिध्दान्त:, वेदार्थज्ञानम्, ब्रह्मसूत्रम्, इतिहास:, पुराण:।

**उपोद्घात:-** दर्शनेषु आस्तिका: नास्तिकाश्च इति द्वैविध्यं वर्तते। धर्माधर्मादिकमस्तीति ये मन्यन्ते ते आस्तिका:। धर्माधर्मादिकं नास्तीति वादिन: नास्तिका:, आस्तिका: प्रायश: सर्वे वेदं प्रमाणत्वेनाङ्गीकुर्वन्ति। अपौरुषेयत्वेन वेदस्य प्रामाण्यं न्यायवैशेषिकदर्शनकारान् विहाय सर्वे आस्तिका: अङ्गीकुर्वन्ति। न्यायवैशेषिकास्तु ईश्वरोक्तत्वेन वेदानां प्रमाण्यं वदन्ति। ऋषभनामकभगवतो पुत्रस्य महाभागवतोत्तमस्य भरतचक्रवर्ते: शासितत्वात् अस्माकं वर्षस्य भारतवर्षमितिनाम। अस्मिन् वर्षे सनातनवैदिकपरम्परा अनादिकालत: प्रवर्तमाना अद्यापि प्रवाहरूपेणास्ति।

1. वेद इति शब्दश्रवणेनैव प्रायश: जिज्ञासूनां स्मृतिपटले अपौरुषेय: शब्दराशि: प्रतिभाति। अद्यतनाधुनिकप्रपञ्चे वैज्ञानिकान्वेषणरूपभौतिकवादप्रभावयुतानां प्रश्नप्रकारस्तु इत्थं वर्तते। वेदाध्ययनेन प्रयोजनं किम्? प्रायश: एतादृशप्रश्नस्य कारणं नाम जगति दृश्यमान वैदिकव्यापरान् दृष्टवा मनसि वेदादिविषये अयं व्यापार: निष्प्रयोजक: इति निश्चयोजायते। तथा च वैदिकानां संस्कृतानभिज्ञतापि अपरं कारणं। एतद्धमेव अनावरपात्रता वेदानामिति। पूर्व चार्वाकादि वेदविरोदिभि: वेदविषये ये प्रश्ना: उत्थापिता: त एव अद्यतनाधुनिकै: उत्थापिता सन्ति। एतादृशप्रश्नसमाधानं केचन एवं कुर्वन्ति। वेद इत्युक्ते

**Copyright © 2023 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)** which permits unrestricted use, distribution, and reproduction in any medium for non-commercial use provided the original author and source are credited.

ज्ञानभाण्ड:, तत्र वैज्ञानिका ये अंशा: बर्तन्ते। तान् ज्ञातुमसमर्था वेदोपजीविन: कर्मकाण्डद्वारा धार्मिकभावनया जनान् स्वीयान् कृत्वा वेदाध्ययनविमुखान् जिज्ञासून् कृतवन्त: इति। अपरेतु वेदे वैज्ञानिकादिविषयपरत्वं किमपि नास्ति, केवल पारमार्थिकचिन्तनमेव तत्र वर्तते। वेदाध्ययनविधी परम्परया या रीति: प्रदर्शिता तया रीत्यैव वर्तमानस्सन् जीवनयापनं कृत्वा वेदाध्ययनफलभाक् भवितव्य: इति वदन्ति।

2.मध्वाचार्यै: वेदविचारे यदुक्तमस्ति तद् पूर्वोक्त सर्वसंशयपरिहारकं वर्तते। भारतीयसनातनसन्मनोल्लासभूतमेतदुत्तरं, किमर्थमित्युक्ते आचार्योक्तवचनै: वेदाध्ययनस्य अवश्यकता अनिवार्या इति जिज्ञासूनां मनसि भावनोत्पद्यत एव।

3. वेदो नाम अपौरुषेयशब्दराशि: तस्य वेदस्य अपौरुषेयत्वं नाम स्वतन्त्रपुरुषपूर्वकत्वाभावविशिष्टवर्णक्रमित्वं।

1. स्वयं भगवता कृष्णेन वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद् वेदविदेव चाहमिति वेदकर्तृत्वं मयि विद्यते तथा वेदज्ञानवान् अहं, न तु तस्य कर्ता इति प्रतिपादितत्वाच्च अपौरुषेयत्वसिध्दिर्भवति। वेदस्य त्र्यर्थत्वं महाभारतस्य दशार्थत्वं तथा विष्णुसहस्रनामस्य शतार्थत्वंच वर्तते इति मध्वाचार्या: सप्रमाणकं प्रतिपादितवन्त:। अयमंश: सुमध्वविजये षष्ठसर्गे प्रतिपादितो वर्तते

**2.स्यात् तथेत्यमपि सम्भवितार्थ:**
**त्र्यर्थतां श्रुतिषु वित्तदशार्थम्।**
**भारतं ननु शतार्थमपि स्यात्**
**वैष्णवं पदसहस्रतयं हि।।**

वि.टि. तथा चोक्तं: त्रयोऽर्था, सर्ववेदेषु दशार्था: सर्वभारते। विष्णो: सहस्रनामापि निरन्तरशतार्थकम्।

4. एतेन ज्ञायते वेदस्य अधिकारिवर्ग त्रिविध: इति। वेदस्य व्यर्थत्वं नाम भौतिकार्थप्रतिपादनरूपस्थूलार्थत्वं प्रथमत्वं, देवतावाचकत्वं द्वितीयत्वं, तृतीयप्रकारस्तु परममुख्यवृत्या (महायोगेन महारूढ्याच) परमात्मप्रतिपादकत्वम्। ये वेदेषु केवल भौतिकार्यान्वेषका: ते स्थूलेनैव सन्तुष्टा: भवन्ति, त एव सामान्याधिकारिण: अपरे ऐहिकामुष्मिकफलानुरागिण: देवताराधनपरं वेदमिति ज्ञात्वा वेदाध्ययनं कुर्वन्ति। ते मध्यमाधिकारिण:, ये परमात्मन: अत्यर्थ प्रसादमिच्छन्ति ते वेदाध्ययनं भगवत्प्रतिपादकत्वेन चिन्तयन्ति। एत एवं उत्तमाधिकारिण:, एतेषामेव वेदाध्यनपंथा अत्यन्तं साधुरिति अचार्यमध्वाभिप्राय:।

मुख्यतया वेदानां अनादिकालत: प्रवर्तकत्वं किमर्थमिति प्रश्नस्य समाधानं स्वयं वेदा: एवमूचुरिति स्वीयग्रन्थेषु आनन्दतीर्थ भगवत्पादा: एनां श्रुतिं उदाहरन्ति।

3."अदु:खमितरत्सर्वं जीवा एव तु द:खिन:।
तेषां दु:खप्रहाणाय श्रुतिरेषा प्रवर्तते"।। – श्रुति:

4. "ऋगाद्या अपरा विद्या यदाविष्णोर्नवाचका:।
ता एव परमा विद्या यदा विष्णोस्तु वाचका:"।।–इतिपरमसंहितायाम्

5. "द्वेविद्ये वेदितव्ये इति ह स्म यद्ब्रह्मविदो वदन्ति।
परा चैवापराच तत्र परा ऋग्वेदो यजुर्वेद: समावेदोअथर्ववेद:
शिक्षा कल्प व्याकरणं निरुक्तं छन्दो ज्योतिषमिति।
अथ परा यया तदक्षरमधिगम्यते"। –आथर्वणोपनिषत्

6. "इतिहास पुराणाभ्यां वेदं समुपबृंहयेत्"।

7. "वेदे रामायणे चैव पुराणे भारते तथा
आदावन्ते च मध्येच विष्णुस्सर्वत्र गीयते"।-हरिवंशेषु

8. "सर्वे वेदा यत् पदमामनन्ति
तपांसि सर्वाणि च यद् वदन्ति।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं सङ्हेण ब्रवीम्योमित्येत्"।।- काठकोपनिषत्

9. ब्रह्मसूत्रानुसारेण वेदाद्यं सर्वमेव च।
योज्यं न ब्रह्मसूत्राणि दृश्यमानार्थतोऽन्यथा।।- इति च ब्रह्मवैवर्ते

वेदस्य अपौरुषेयत्वसिध्दि: कथमित्युक्ते अनुमानागमद्वारेव इति श्रीमन् मध्वाचार्या: तथा जयतीर्थ श्रीचरणा: स्वीयग्रन्थेषु प्रतिपादितवन्त:। तत्रप्रदर्शितषु कश्चनभागं यथामति प्रदर्शयामि।

5. **विष्णुतत्वनिर्णये मध्वाचार्या**:-"अपौरुषेयत्वं च स्वतएव सिध्दं वेदकर्तु: अप्रसिद्धे:। अप्रसिद्धे च तत्कर्तु: तत्कल्पने कल्पना गौरवम्। अकल्पने चाकर्तृत्वं सिद्धमेव इति प्रतिपादितवन्त:। जयतीर्थश्रीचरणा: एतस्य व्याख्यानावसरे वेदो अपौरुषेय: अप्रमितकर्तृकत्वात् गगवनत् इति अनुमानं प्रदर्शितवन्त:। यथा गगनस्य कोऽपि कर्ता प्रमितो नास्तीतिकारणात् पुरुषनिर्मितत्वं नास्तीत्युच्यते तथैव कर्ता न प्रमित: तस्मात् पुरुषनिर्मितत्वं नास्तीति।

10. बिंशल्लक्षणतोऽनूनस्तपस्वी बहुवेदवित्।
वेद इत्येव यं पश्येत् स वेदो ज्ञानदर्शनात्-ब्रह्माण्ड पुराणवचनम्

11."नित्यावेदा समस्ताश्च शाश्वता विष्णुबुद्विगा:
सर्गे सर्गेऽमुनेवेत उद्गीर्यन्ते तथैवच।
तत्क्रमेणैव तैर्वर्णैस्तै स्वरैरेव नचान्यथा"।

सजातीयोच्चारणमनपेक्षोच्चारयितापुरुष: स्वतन्त्र: तादृश स्वतन्त्रपुरुष पूर्वकत्वाभावो वेदानां वर्तते, अत: आकाशगुणे शब्दे व्यज्यमाना: वर्णादय: तत्क्रमात्मको वेदश्च नित्यएव इति सिध्वम् -विष्णुतत्वनिर्णये

12."निर्णयस्त्वागमनैव नानुमा आगमवर्जिता।
क्वचिन्निर्णीतिहेतु:स्यादत: शास्त्रात् विनिर्णय:"-इति भारते

13."अदोषत्वात् गुणत्वाच्च बलवत् कार्यसाधनात्
वेदोक्तकर्मयुक्तानां तथासिध्दिमतामपि"
असाध्यं वा ततो वेदा: प्रामाण्यं निश्चयात् गता: इति-भविष्यत् पुराणे

14.वाक्यप्रामाण्यं हि वक्तृदोषनिबंधनात् वेदस्य च अपौरुषेयत्वेनतदभाव:सिध्द:।

15.वेदो नाप्रमाणं अप्रामाण्यकारणदोषशून्यतत्वात् प्रत्यक्षादिवत् प्रथमानुमानम् वेदो प्रमाणं बलवत्कार्य साधनत्वात् सम्मतवत। द्वितीयानुमानम्

**सन्दर्भसूची**:-


1. श्रीमद्भगवद्गीता, अध्याय 15 श्लोक - 15
2. श्रीसुमध्वविजय (द्वैतवेदान्तप्रतिष्ठान प्रकाशित) षष्ठसर्ग:- श्लोक, 4 पृष्ठ 252
3. श्रीमदनुव्याख्यान वैशेषिकाधिकरण......श्लोक संख्या-135

श्रीमन्न्यायसुधा (षट्टिप्पणीसहिता) पृष्ठ संख्या 3785
4. आथर्वणोपनिषत्भाष्यम् सर्वमूलग्रन्था: - पृष्ठ 70
5. आथर्वणोपनिषत्भाष्यम्... सर्वमूलग्रन्था: पृष्ठ 71
6. भागवततात्पर्यम्.... सर्वमूलग्रन्था:
श्रीमन्न्यायसुधा (षट्टिप्पणीसहिता) पृष्ठ संख्या 4095
7. ब्रह्मसूत्रभाष्यम्......... .... अध्याय पाद- 1
8. काठकोपनिषत् 'भाष्यम्..... सर्वमूलग्रन्था: पृष्ठ 35
9. विष्णुतत्वनिर्णय: पृष्ठ 127
10. विष्णुतत्वनिर्णय: पृष्ठ 140
11. विष्णुतत्वनिर्णय: पृष्ठ 141
12. बृहदारण्यक भाष्यम् (भावबोधसहितम्) पृष्ठ 160
13. बृहदारण्यक भाष्यम् (भावबोधसहितम्) पृष्ठ 176
14. बृहदारण्यक भाष्यम् (भावबोधसहितम्) पृष्ठ 176
15. बृहदारण्यक भाष्यम् (भावबोधसहितम्) - पृष्ठ 176